This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

4811

॥श्रीगणेशाय नमः॥ तुंदिलमिंदुकलाधरिसुतं विघ्नसंघातं ॥ ढुंढिं जोकि
लकामं कायरिपोरथं हृष्यजन्तं ॥१॥ दिवाकरो देवविदां वरिष्ठो येषो विश्वना
थोऽजनि जातगर्भकः ॥ सुकेशवस्याब्दफलस्य टीकां करोति सोदाहरणां
प्रसन्नां ॥२॥ श्रीमत्केशवदैवज्ञः निर्विघ्नं ग्रंथसमाप्त्यर्थं तत्प्रचयार्थं
गणेशं नमस्कृत्य चिकीर्षितं प्रतिजानीते इति अथ द्वे शवः ति
सिध्यतिं यामं क्रमादनुक्रमेण नवच्मि कथयामि॥ किं कृत्वा गणेशं
नमस्कृत्य नत्वा अन्येषामाचार्यैः तांत्रिकोक्तं जातकशास्त्रोक्तं हायनोत्थं
वर्षजातं फलं क्रमात् प्रोक्तं कुतः यतो दुर्गमं सुगमरीत्या ज्ञातुं अ
शक्यं॥ अतः हे अवेदव्यं॥ कया प्रस्फुटतरया॥ किं विशिष्टां पद्धति
बालावबोधां॥ बालानामप्यवबोधो ज्ञानं यस्यां सा तथा॥ अतिसु
गमामित्यर्थः॥ ॥ अथ वर्षफलज्ञानार्थं किं कार्यमित्याह॥ ॥
ज्ञात्वाइति॥ ॥ यत्राऽर्कः यदि ते जन्मार्कतुल्यः जन्मकालीन
स्पष्टार्कतुल्यो रविः स यो भवति तद्दिने अब्दप्रवेश अब्दस्य व

Acc. NO. 4811 M-1848
Title - केशवविरचित वर्षफलस्य टीका.
Author - टी. :- विश्वनाथ.
Date - ?
Sub - ज्योतिष.
folio - 18.
Xerox - 36

KKSU LIBRARY RAMTEK 441 106 M-1848 Dist. Nagpur

Checked 2012

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

षस्यमुखं आदिर्य वेत्॥ एवं प्रतिसमं प्रतिवर्षं जन्मस्य गोद
यान् जन्मकालिन॥ मह्दयान्सूर्यादयोग्रहा: उदयोतनं
तान्कालात्या विज्ञाय॥ तदोनयुनप्रकारमाह॥ गते गतस
मा: गतवर्षाणि॥ जन्मकालिनो शक: वर्तमान शकाद्धि शोध्य:
शेषं जन्मकालादारभ्य इष्टवर्ष पर्यंतं गतसमा: भवेति॥ ता:
शैलाभ्रदिध्ना: समाधिकसहस्रणा १००७ घ्रा: गुणिता:॥
तत: खाभ्रेभे: ८०० अष्टशते: हृता: भं का: फलंदिनानि॥ शे
षंषष्ठि ६० गुणं हरभंकेलब्धं घटिका:॥ पुन: शेषंषष्ठिघ्नं हरभके
लब्धं पलानि॥ पुन: शेषंषष्ठिघ्नं हरभंके शेष अक्षराणि॥ घटि
पलादिपूर्वं फलेय यानुक्रमं योज्यं गतपथा॥ पूर्वं दिनादि
लब्धं तद्दिनेवासर: योज्य: घटिकायांउदयाज्जननं पर्यंतं गत
घटिकायोज्या:॥ रात्रौ जन्मनि रात्रि गतघटि घु दिनमानं संयो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ज्यं ॥ तासु षष्ट्या ६० हृतासु लब्धं दिनेयो ज्यं ॥ पश्चात्त्रयोदश गु
णितः सा यव केषा ष्टि पला धीयव सहिते तद्धार अब्दादि ॥
वर्षादिः स्यात् ॥ अत्र जनिजः मासः स्फुटः स्पष्टोऽज्ञेयः ॥ यस्मि
न् मासे जन्म तस्मिन्मासे वर्ष प्रवेशो ज्ञेयः इत्यर्थः ॥ क्वचित्क
स्मिंश्चित् स्थले भून युक् उनश्च युक् श्चा उन युक् एकरहित
स्तु युक्तो वा कार्यः ॥ अयमर्थः ॥ यदा जन्मार्क तुल्यो रविर्जन्म
मासे नायाति पूर्वे परे मासे वा याति तदा एक रहितः एक युक्तो
वा मासः इत्यर्थः सिद्धं ॥ ॥ उदाहरणं ॥ संवत् १६३६ शके १५०१
समये आश्विन शुद्ध ६ शनौ घटिका: १४ पल नि ३४ मूलन
क्षत्र घटिका: ४२ पल ५० शोभन योग घटिका: ३४ पल १ दिन
प्रमाणं २८।१२ अत्र सूर्योदयात् गत घटिषु ४ पलेषु ६

२

कस्यचिज्जन्म॥स्पष्टः सूर्यः ५।२४।४५।२२। लग्नं ४।१६।२८।१५।८।३७
क्षपाद्ध्वचरखंडानि ६०।४८।२०। देशांतरयोजनानि ३६ ऋणानि ॥
अथवर्षप्रवेशः साध्यते ॥ जन्मकालीनशकः ॥१६५०१ वर्तमानशको
नू १६८३२ ग्राधितः शेषं गतसमाः ३२ शेलाब्धि २००७ घ्राः ३२२१८
स्याभ्रेभैः ८०० हृताः फलं दिनाद्यं ३१।२।१६।३०। जन्मवासरादि
।०।४।६।। युतं ३१।५।२२।३०। समतष्टे जाते सावयव वारादि ॥
४।५।२२।३०। एतस्मिन्सावयव दिने जातो वर्षप्रवेशः ॥
अथैतद्वर्षादि प्रवेशादिन प्रवर्षादि प्रवेश ज्ञानार्थ उपायः ॥ भुवो
बाणाश्च द्वैकुरामैः खरामैर्युतं पूर्ववर्षाब्दवासरादि ॥ भवेद्दिन
प्रोवर्षवेश सदा निर्निमियो जितांशं कृरैर्जातवरोरल ॥१॥ पूर्व
वर्षप्रवारादि कमागतं यस्मिन्वारादिके यं क्षेपकः १।२५।३१।३०॥
योजितः सोग्रिमवर्ष प्रवेशसमये वारादि भवति ॥ एवं मा

२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वप्रवेशो दिनप्रवेशश्च बोध्यः ॥ एवं वर्षमासदिनप्रवेशस्तिथ्यो एका
दशायोऽज्या ॥ आगामिवर्षमासदिनप्रवेशतिथिर्भवति ॥ एवं वर्षादौ वा
स्तरादिक्रकौऽङ्गे ॥ तिथिज्ञानमाह ॥ रुद्रघ्नास्समा इति ॥ ११ ॥ रुद्रघ्ना एका
दशगुणिताः इतसमाः गत [redacted] वर्षाः कार्याणि ॥ ताः पृथक् ॥ स्वकीयेन स्वा
ब्धिकूलवेन १७० आढ्याः युक्ताः कार्याः जन्मकाले यातिथिस्तयान्विताः ॥
युक्ताः तिथिगणनाम्नुक्रमेति पदमारभ्य कार्या तत्सा तिथयः खानि ३०
मितष्टाः शेषं अब्दस्य वर्षस्य मुखतिथिरादितिथिस्तत्र जातिथिः
स्यात् ॥ वर्षप्रवेशतिथिरित्यर्थः ॥ साकचिङ्कनयुक्ता वा कार्या एतदुक्तं
भवति ॥ वर्षप्रवेशाधारेणैव निर्णयः ॥ यदा तस्मिन्पूर्वनीतवासरे सा
तिथिर्नायाति ॥ पूर्वस्मिन् परस्मिन्वा वासरे आयाति तदैकोना युक्ता वा कार्या ॥
एवं उक्तवर्षप्रवेशमासपक्षतिथिवारसमयान् ज्ञात्वा ॥ किं कार्यमित्यत आह ॥
वर्षादाविति ॥ अत्र वर्षादौ स्फुटखेचराः स्पष्टग्रहाः यस्मात्कारणात् इतौ
च्चराश्च स्यात्साध्य ॥ ॥ उन्नो किंवत् जन्मकालप धुक्तिरीस्यात् वा थाद्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दशभावा: ससंधय: कार्या: ।। याताब्दै: तैर्गतवर्षैर्युक्तं जन्म
लग्नं जन्मलग्नराशि नेत्रै १२ द्वादशभिस्तष्टे शेषं राशिस्था
नं थिहा भवेत् ।। इंथिहा मुंथा इति पर्याया: ।। प्रत्यब्दं मुंथा गति:
पंचकला: ।। प्रतिमासे अंशद्वयं त्रिंशत्कला: २।३०। एवं प्र
तिवर्षे एको राशि: ।। १ ।। अस्य वर्षप्रवेश: क्रियते तस्येयस्मि
न्यस्मिन्देशे जन्म तद्देशीय देशांतर पलभा चरखंडोदया ग्रा
ह्या: ।। उदाहरणं ।। गतसमा: ३१ रुद्र ११ घ्ना: ३४१ एषु खस्वा
द्रितु १७० नवाढ्या: ३४३ जन्मतिथ्यान्विता: ३४९ स्वागनिभिस्तष्टा: ३
जाता स्तक्षपक्षचतुर्थी वर्षप्रवेशतिथि: ।। ४ । जन्मलग्ने ५।१५।२६।४८
याताब्दयुते ३७।१५।२६।४८।२ नेत्र १२ तष्टे जाता स्पष्टा मुंथा १।१६।२६।४८
संवत् १८६७ शाके १५३२ आश्विन कृष्णचतुर्थी बुधे घटि २८।२३। लग्नि
कानक्षत्र घटि १५।३२ सिद्धयोग घटि १।२५ अत्रोदयात् गतघटि ५
पले पु २२ अक्षरे ३० पुतुला लग्ने मीमता वर्षप्रवेश: ।। अथ वर्षप्रवेशकालि
न: स्पष्टमा: लग्नादिद्वादशभावा: ससंधयो लिख्यंते ।। ५ ।। ५

स्पष्टग्रहाः सगतयः

सू	चं	मं	बु	बृ	शु	श	रा	मुंथा
५	७	०	८	३	७	९	२	७
२५	६	४	७	४	२	२८	१६	१६
४२	३५	५९	४८	२८	५३	१९	२०	२८
१२	४२	५६	११	०	३८	११	३९	४८
५९	७९८	३५	१०४	६	७२	७	३	५
३०	३२	५१	४	८	१२	५६	११	०

द्वादशभावाः॥

त	ध	स	सु	पु	रि	जा	मृ	ध	क	आ	व्य
६	७	८	९	१०	११	०	१	२	३	४	५
२३	२४	२५	२५	२५	२४	२३	२४	२५	२५	२५	२४
७	३	४	५	४	३	७	३	४	५	४	३
९	२	५५	५०	५६	४	९	२	५५	५०	५६	४

वर्षकुंडलि

भावकुंडलि

द्वादशसंधयः

सं	सं	सं	सं	सं	सं	सं	सं	सं	सं	सं	सं
६	७	८	९	१०	११	०	१	२	३	४	५
८	८	९	१०	१०	९	८	८	९	१०	१०	९
३२	३२	३३	३५	३५	३४	३२	३२	३३	३५	३५	३४
६	६	५८	५३	५३	०	६	६	५८	५३	५३	०

दिनार्धं १४।३६। पूर्वनतं ९।१४। पूर्वोन्नतं २०।४५ स्वोदयाः मेष २९८। वृषभ २५२ मिथु
न ३०३ कर्क ३४३ सिंह ३४७ कन्या ३३८ तुला ३३८ वृश्चिक ३४७ धन ३४३ मकर ३०३
कुंभ २५२ मीन २९८ इति वर्षादि कथनाध्यायः॥ ॥अथ दृष्टिमाह॥ खेकारलि॥
त्रिदशे त्रितिये ३ रुद्रादशे ११ खेन हा खेह फलाचरण दृष्टिः॥ अंबु खे चतुर्थ द

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शमे ४।१० सकटकाद्विचरणादृष्टिः॥ कोणेन वपंचमे ९।५ सुखास्त्र खक्रोदृष्टिः। अ
स्तायथो: सप्तम प्रथमयो: ७।१ वैरावैरक्रो संपूर्णदृष्टिः। अंध्रिचयाश्चरणा
ध्याइष्टानिष्टफलान्दृष्टावर्जितदृश्यकस्य शेषेराशिद्वये राशिदशके पाद
दृष्टिः। एवं तृतीयैकादशस्थाने चरणदृष्टिः। एवं दृष्टावर्जितदृश्यकस्य रा
शित्रये शेषेराशिनवकेचद्विचरणादृष्टिः॥ चतुर्थदशमस्थाने च ४।१० अ
र्धमितादृष्टिः। दृष्टावर्जितदृश्यकस्य शेषे चतुष्टाष्टमी ५।८ ते पंचनवम
५।९ स्थाने पादत्रयमितादृष्टिः। दृष्टावर्जितदृश्यकस्य शेषेषट्राशिभून्येस
समस्थाने प्रथमस्थाने च संपूर्णा चतुश्चरणादृष्टिः॥ मध्येनुपातः। त्रिंशद
शैः ३० गतभोग्यांकांतरं लभ्यते तदा दृष्टावर्जितदृश्यकस्य भागेः त्रिं॥ द्ग

१	२	३	४	५	६	७	८	९	१०	११	१२

र्धफलं भोग्यांके अधिके सति॥ तो कै
युतं कार्यं ध्येये सति हीनं कार्यं॥ संस्थागतह
स्य स्पष्टाकं तो दृष्टिः। धृति॥ परार्धख
गदृष्टः॥ पर राशि षड्कस्थितग्रहदृष्टिः
भागार्धदृष्टिः अधिका॥ पूर्वराशिषट्कस्थितग्रहदृष्टेरधिका तत्र लग्ना
दिषट्कांतं पूर्वार्धं॥ सप्तमादि द्वादशांतं परार्धमिति॥ फलं संख्यावत् सं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्य यातुल्यं ॥ चरणदृष्टौ चरणं अर्धदृष्टौ अर्धं पादोनदृष्टौ पादोनं ॥ संपूर्ण
दृष्टौ संपूर्णमिति ॥ खलखगे पापग्रहेण युतदृक् पापदृष्टिः ॥ शुभे शुभग्रहे सदृ
क् शुभग्रहदृष्टिस्तदा संख्यानफलमिति ॥ व्यस्ये उक्तवैपरीत्ये शुभे पापदृक्
पापे शुभदृक् ॥ तदा अर्धं फलं ज्ञेयं ॥ शीघ्रा शीघ्रगतेर्ग्रहात् लघुरोऽल्पग
तौ ग्रहे अर्कभागविवरे द्वादशभागमध्ये चेत्तदा सा दृष्टिः शस्ता उत्तमा बला
फलं बलाधिक्ये पूर्णफलं ॥ मध्यबले मध्यमं अबलात्यल्पे अल्पफलं ज्ञेयं ॥॥
अथ ग्रहाणां दीप्तिभागानाह ॥ तिथ्य इति ॥ अर्कात्सु पतिथ्यादयो दीप्तिभागाः स्युः ॥ तिथ्यः
पंचदश १५ सूर्यस्य ॥ द्वादश १२ चंद्रस्य ॥ अष्टौ भौमस्य ॥ नगाः ७ बुधस्य ॥ अंकाः ९
गुरोः ॥ शुक्रस्य ८ गोः ॥ नव ९ शनेः ॥ दीप्तिभागा इत्यर्थः ॥ तैः दीप्तिभागैः द्रष्टृदीप्तित
दृश्यखेटफलं वा दृष्टेर्गतो दृक्संभवेत् ॥ एतदुक्तं भवति ॥ पश्यति स दृष्टा तस्य शास्त्रे
रूपमिता परिमिता दृश्यखेटस्याबलो क्यमानस्याग्रहस्य तथा भागाः संतोति ॥
तदा संपूर्णा दृष्टिः ॥ यदा द्रष्टृग्रहभागेभ्यः द्रष्टृग्रहदीप्त्यंशतुल्यैः दृश्यग्रहगैः ए
कैकस्तैः अल्पैः अगतो वाधिकैः सन्निकृष्टा दृष्टिर्भवेत् ॥ इयं दृष्टिर्दृष्टमुख्यशी
लार्थ उपयुक्ता ज्ञेया ॥ उदाहरणं ॥ गुरुर्द्रष्टा ३।४।५ ॥ शुक्रो दृश्यः ५।२।४३ ॥ द्रष्टृभागे
भ्यः ४ दृश्यभागान्यूनाः संति ॥ द्रष्टृदीप्त्यंशमध्ये स्थितो अनयोर्दृष्टिरस्ति इति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

५

ज्ञातव्यं ॥ इहताजिके अर्कार्किशितेंदुज्ञाः चंद्रशनिशुक्रबुधाः नार्यः स्त्रियग्रहाः उत्ये
रविभौमगुरवः पुरुषग्रहाः अत्रनपुंसकाः न संति ॥ अथचत्वारि हर्षस्थानानि ॥ तत्र हर्ष
स्थानत्रयमाह ॥ रात्र्येति ॥ रात्र्यह्नि हर्षिताः ॥ रात्रिदिवासंहर्षिताः अयमर्थः ॥ स्त्रीग्रहाः
रात्रौ पुरुषग्रहाः दिने आनंदिताः ॥ लग्नात्रित्रिषु ॥ लग्नादारभ्य त्रिषुराशिषु ॥ तन्मद्वि
तीयतृतीयराशिषु वर्तमानाः स्त्रीग्रहाः हर्षिताः ॥ तत्रस्त्रीपुराशिषु चतुर्थपंचमष
ष्ठस्थानेषु वर्तमानाः पुरुषग्रहाः ॥ सप्तमाष्टमनवमस्थानेषु स्त्रीग्रहाः ॥ पुनर्दशमैकाद
शद्वादशस्थानेषु पुरुषग्रहाः हर्षिताः इति ॥ अथस्वात्सू यमारभ्य सूर्यादिग्रहाणां
मोग्नीत्यादि हर्षस्थानानि भवंति ॥ लग्नादिति संबंधः ॥ तद्यथा लग्नान्नवमस्थः
सूर्यो हर्षितः ॥ अग्निस्तृतीयं तत्रस्थश्चंद्रः ॥ रसाः षट् तत्रस्थो भौमः ॥ सूरुकस्तत्रस्थो
बुधः ॥ रुद्राएकादशस्था गुरुः ॥ इषवः पंच तत्रस्थः शुक्रः ॥ रिपुः द्वादश तत्रस्थः शनिः ॥
हर्षितो भवतीति अत्र हर्षस्थानत्रमुक्तं ॥ चतुर्थं हर्षस्थानं ग्रंथांतरात् तद्यथा ॥
ग्रहः स्वगेहे सति अथवास्वक्षेसति चतुर्थं हर्षस्थानं ज्ञेयं ॥ स्वगृहे यद्बलं तदेव स्वक्षे
उभयत्रापि सति पंचविंशोपकाबलं ॥ तत्तुद्विगुणं अत्र त्रिंशतिविंशोपकाः परमबलं ॥
तत्र चत्वारि हर्षस्थानानि ॥ इति कारणात् चतुर्भिर्भक्ता लब्धा पंचविंशोपकाः ॥
एवं चत्वारि हर्षपदेषु प्रत्येकं पंचविंशोपकाः बलानि स्थाप्याः ॥ अथोदाहरणं ॥ दिवा
वर्षप्रवेशः अतः पुरुषग्रहाणां रविभौमगुरूणां प्रथमं हर्षपदं जातं तत्र बलं

१५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पंचविंशोपका:॥ लग्नात्तृतीयमे द्वितीयाष्टमस्था: स्त्री ग्रहा:॥ बुधार्कभूसुतश्चंद्र: द्वादशो

द्वादशो॥ पुरुषग्रहौ गुरुरवी स्त:॥ तेषां द्वितीयं पदं आगतं तत्रापि बलं पंचविंशो

पकाः ५॥ अथ रसयोदयो लग्नाद्ग्रहो स्थाने त्यादि सुगमं तत्रापि बुधो लग्ने स्त्री अत

स्तत्रायं हर्षपदं जातं अत्रापि बलं पंचविंशोपका:॥ शनि भौमो ग्रहा के त्रिष्टाः तयोश्च

तुर्थं हर्षपदं आगतं॥ गुरुश्चंद्रो स्थो ग्रहस्त:॥ अतो बलं पंचविंशोपका:॥ एवं सर्वेषां

हर्षस्थानानि तेषु भस्त्येत्नू बलानि तदेक्यानि च त्रिरस्यते॥ इति हर्षस्थानानि॥ अथ द्वाद

शवर्गीच कस्मात्॥ खेटो त्रिशिराशिपा: राशिस्वामिन: ये जातक शास्त्रे उदिता:

उक्ता स्ते ज्ञेया:॥ यदाह वराह:॥ अजवृषभमृगांगनाकुलीरा झषवणिजौ च दि

वाकरादतुंगा:॥ दशशशीरवि मनु युक्तिथीन्द्रिय शेरिंशन्नवक

विंशतिभिश्च तेऽस्तनीचा:॥ इति॥ अथमेशाः॥ केशाभौमास्फुजिल्लेंदुरवि

बुधास्फुजिज्जीवस्य मंदार्कि जीवाइति॥ महिलग्नेवाय न्नशेन ग्रशी शो ग्रहस्वामि॥

अथहोरा कथ्यते॥ विषमराशावादो पंचदशांशमध्ये ग्रहे सति सूर्यस्य ततः पं

चदशांश चंद्रस्य समराशावादो पंचदशांशश्चंद्र: स्यात्॥ तत: पंचदशांशा: सू

र्यस्येति होरा द्वयं॥ अथ त्रिंशांशादीन् द्वादशवर्गान् आह॥ भागीभूतेति॥

KKSU LIBRARY RAMTEK 441 106 M-1848 Dist. Nagpur

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सू	चं	मं	बु	बृ	शु	श	ग्रहाः॥
५	०	५	०	५	०	०	दिनराशिबलाः
५	५	०	५	५	५	०	लग्नात्त्रिवि
०	०	०	५	०	०	०	गोमीत्यादि
०	५	५	०	५	०	५	स्वगृहोच्चे॥
१०	१०	१०	१०	१५	५	५	सर्वयोग॥

सू	चं	मं	बु	बृ	शु	श	ग्रहाः॥
०	१	९	५	३	११	६	उच्चानि॥
१०	३	२८	१५	५	२७	२०	
०	०	०	०	०	०	०	
६	७	३	११	९	५	०	नीचानि॥
१०	३	२८	१५	५	२७	२०	
०	०	०	०	०	०	०	

मे	वृ	मि	क	सिं	क	तु	वृ	ध	म	कुं	मी	राशयः॥
मं	शु	बु	चं	र	बु	शु	मं	गु	श	श	गु:	स्वामिनः:

भागाभूतखनागात् ग्रहस्य राशयः त्रिंशोना गुण्या॥ अथ स्वभागयुक्ता॥

ते भागास्युः॥ एवं भागी स्तनाऽहारुत्रिभागाः कमुरखार्कैशातसंख्या ते तास्त्रिभाग के
भुरवे आदौ अर्कांशो द्वादशांशाऽ तेष्वेषां वर्गाणां षट्सप्तमासप्तदशमैकादशद्वादशां
शास्तेषां संख्यया गुणितात्॥ तथा॥ ततीयांशश्चेत्तदा त्रिभागा गीर्भूतखनागात्॥
चतुर्थांशश्चेत्तदा चतुर्गुणोत्यादि एवं अंशसंख्यागुणानात् ग्रहाहात्॥ स्वा ग्न्योः
सा त्रिंशतूर्ध्वमिताइ॥ गता स्तनीयांशादयः स्युरिति सर्थः॥ षड्बलानि॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

षडंशमारभ्य एकादशांशपर्यंतं रवेः १२ द्वादशभिस्तष्टे शेषस्य गणनाक्रमः । अथ आ
तो मेषादारभ्य ॥ अंत्यः द्वादशांशः रवेः १२ द्वादशभिस्तष्टे अवशेषितः स्वभावात् ॥
स्वराशेः सकाशाद्गणनीयः इति नियमेषात् ॥ अथ त्र्यंशादित्रयाणां विशेषमाह ॥
द्यात त्र्यंशशराकृति रिति ॥ यातागता ये पूर्वं साधिता त्र्यंशास्तेषां पंचानां आकृति
गुणनं कार्यं ॥ सा आकृति द्विगुणा द्वियुक्ता ॥ अंगैः सप्तभिस्तष्टा अंकितः रविमा
रभ्य त्र्यंशपाः त्र्यंशस्वामिनो भवंति ॥ वेदलवाः पूर्वानीत चतुर्थांशास्ते च
तुर्भिस्तष्टास्ततः त्रिगुणिताः लब्धान्विताः चतुर्भकं यल्लब्धं तेनान्विताः युक्ताः
ते च तुर्थांशस्वामिनः क्रियात् मेषमारभ्य गणनीयाः ॥ इषुलवाः प्रागानीताः
पंचमांशादिकृतघ्नाः शेषं कुजार्कि गुरु विघ्नु क्रास्तु जिले ऽन्यकान्यारिः ॥ भौमश
नि गुरु बुध भृगु शुक्र बुध गुरु सूर्य भौमाः क्रमेणस्वामिनः स्युः ॥ इष्ट निजे
स जौ स्व मित्र स्वगृहोच्चे गृहे स्वजितस्य ग्रहस्य द्वादशवर्गः ॥ गृह होरा
तीयांश चतुर्थांश पंचमांश षष्ठांश सप्तमांश अष्टमांश नवमांश द्वादशमांश
एकादशांशरूपः शुभः शुभफलदः अन्यः नीचारिगृहगो ऽस्तंगतादिग्रह
स्य द्वादशवर्गः अशुभफलदः ॥ तत्र ग्रहाणां शुभवर्गपापवर्गपंक्तिद्व
यांतरस्याधिक्ये शुभाव शेष ग्रहो बलीबलिष्ठः अशुभाचशेषे निर्बलः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

८

उदाहरणं ॥ अत्र रविः कन्यायां अतो ग्रहेशो बुधः समराशौ द्वितीयहोरायां ति
ष्ठति अतो होरेशो रविः ॥ रविः ॥५।२४।४२।१२ भागीभूतः १७४।४२।१२ त्रि
गुणः ५२४।६।३६ त्रिंशद्भक्तेः फलं गतास्तृतीयांशाः यातश्चांशाः १७ शा
राहतिः ८५ द्वियुक् ८७ सप्तलब्धावशेषं ३ अर्कास्त्रयोगताः वर्तमानो बुधः
स्वामी भागीभूतश्चतुर्गुणितं ६९८।४८।४८ त्रिंशद्भक्तेः गताश्चतुर्थांशाः
२३ हते सप्तः लब्धं ५ शेषांशाः ३ गुणहताः ९ तथान्विताः २५ द्वादश
भिस्तष्टाः शेषं १ आतो वर्तमानश्चतुर्थांशेशो बुधः ॥ भागीभूतपंचघ्नाः
८७३।१०।० त्रिंशद्भक्ताः फलं गतपंचमांशाः २९ दिक्तष्टाः शेषं ९ नवगताः
विषमानोदशामस्तदधिपो भौमः पंचमांशेशः ॥ भागीभूतस्वगः षड्घ्नाः १०४८
१३।१२ त्रिंशद्भक्तेः लब्धं गताः षष्ठांशाः ३४ इनैस्तष्टाः शेषं १० दशवि
द्यमानः षष्ठांशेशो मेषादिगणनीयाः ॥ शनिः भागीभूतः सप्तघ्नाः १२२२
५५।२४ त्रिंशद्भक्तेः फलं गताः सप्तमांशाः ४० इनैस्तष्टाः शेषं ४ मेषादिगणनी
याविद्यमानसप्तमांशेशो रविः भागीभूतोऽष्टघ्नः १३९७।३७।३६ त्रिंश
द्भक्तेः लब्धं गताः अष्टमांशाः ४६ इनैः तष्टाः शेषं १० मेषादिद्यमाने अष्टांशे

८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शो: शनि:। भागीभूत रवगोनव घ्ना: २५७२।११।१४ त्रिंशद्भक्त: फलं गतनवमां
शा: ५२। इनैस्त्यक्ता: शेषं ४ विद्यमान नवमांशेशो रवि: भागीभूत रवयोदश घ्ना:
१७४७।२।०। त्रिंशद्भक्त: फलं गतदशमांशा: ५८ इनै:त्यक्ता: १० विद्यमानदशमांशेश:
शनि: [illegible] भागीभूत एकादशघ्ना: १९२१।४४।२२। त्रिंशद्भक्त: फलं गतैकादशांशा:
६४ इनै:त्यक्ता: शेषं ४ विद्यमानैकादशेशो रवि: भागीभूत द्वादशघ्ना: २०९६।२८
२४ त्रिंशद्भक्त: फलं गताद्वादशांशा: ६९ इनैस्त्यक्ता: शेषं ९ स्वराशे: स्तु शात्
विद्यमानद्वादशांशेशो बुध:। एवं जाता: सर्वे पांद्वादशवर्गिका: अलिख्यन्ते।।
इति द्वादशवर्गिका।। अथ हद्दास्वामिन आह।। षड्षट्कं तिं। सिंके तिं।। चापे तिं।।
मेषस्थित ग्रहस्य प्रथमभाग षट्स्वामि गुरु:।। ततो भाग षट् स्वामी
शुक्र:।। ततो भाग षट्स्वामी बुध:।। तत: पंचम भाग स्वामी भौम:। ततो
भाग पंचक स्वामि शनिरिति।। एवमन्येपि बोध्यं।। स्पष्टं चक्रस्थ
स्तं हद्दाचक्रं।। अथ ग्रहाणां मित्रामित्राण्याह।। सूर्यादिति।। सूर यो
सूर्यमारभ्य ग्रहाणां मित्राणि स्युः।। गुरुभौमचंद्रा: सूर्यस्य।। ५।।

15

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

८

अथ षड्दशवर्गचक्रं ॥

सू	चं	मं	बु	बृ	शु	श	
बुश	शुमि	स्व	शुमि	गुमि	मंश	स्व	ग्रह
स्व	स्व	रमि	रश	शुमि	चंशु	रश	हो
बुश	गुश	स्व	चंश	गुमि	मश	रश	द्रे
बुमि	रमि	स्व	शमि	बुमि	मश	रश	चं
मंमि	बुश	स्व	शमि	गुश	स्व	मश	प
शश	ममि	रमि	शुमि	गुश	स्व	मश	प
स्व	बुमि	गुश	शुश	शश	स्व	मश	सं
शश	शश	शुश	स्व	गुमि	बुश	शुश	अं
स्व	बुमि	शुश	गुश	शुमि	चंश	बुमि	नव
बुश	ममि	गुश	स्व	शुमि	शमि	चंश	द
स्व	शुश	गुश	गुशु	शश	स्व	गुमि	द
बुश	रमि	गुश	शमि	रमि	गुश	मश	द्वा
२	६	२	५	६	१	२	शुभ
६	५	६	५	६	७	९	पाप

तद्वारस्वामिन: ॥

मे	वृ	मि	क	सि	क	तु	वृ	ध	म	कुं	मी
[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]
[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]
[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]
[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]
[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]

अथ मित्रामित्रचक्रं ॥

सू	चं	मं	बु	बृ	शु	श
गु	र	र	शु	मं	बु	श
मं	मं	गु	श	सू	सू	बु
चं	गु	चं	श	चं	श	शु

रविर्भौम गुरु रम चंद्रस्य
सूर्य गुरु चंद्रा: भौमस्य
शुक्र राहु शनयो बुधस्य ॥
भौम सूर्य चंद्रा: गुरो: ॥
बुध राहु शनय: शुक्रस्य
राहु बुध शुक्रा: शने: ॥ शुक्र बुध शनय: राहोर्मित्राणि

८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ये अन्ये मित्रमित्रास्ते अरयः ॥ तद्यथा ॥ बुध शुक्र शनि राहवो रवि चंद्र
भौम गुरूणां ॥ रवि चंद्र भौम गुरवो बुध शुक्र शनि राहुणां शत्रवः ॥
ज्ञातकाचार्य मतेन समान संज्ञि ॥ क्रूराक्रूर स्वभाव स्वभावं ॥ क्रूरा: पापा:
अक्रूरा: सौम्यास्तेषां स्वभावं राशेश्च ओ रविलग्ने संपूर्ण । नाडीकालस्त्रैपं ॥
ग्रंथविस्तरभयान्नात्र लिख्यंते ॥ इति मित्रामित्राध्यायः ॥ अथ नीडाको तषोडशयो
गेषु मुथशीलादि योगत्रयमाह ॥ तत्कदीति ॥ को कथं मिति ॥ तत्कदी यत्क्रूर शिस्थित
ग्रहयोर्मध्ये अधिकाः अधिकांशो निर्गहः ॥ अल्पगतोर्गैहातु ॥ स्वघातबोधा गे: अ
ल्प: दीप्तांशमध्ये शीघ्रग्रहस्य दीप्तांशावधि तदा मुथशीलमभव ज्ञातं वादीप्तांश
वा ये ग्रहयोरंतरे दीप्तिभागाधिके सति तदा मुथशीलमभ्युक्तं अथ मेकोपोगः ॥
दीप्तिभागाग्रागुकास्तिच्यकैः स्यादिना ॥ भावेकराशिस्थो म्नोसमो भागाधव
यवत्तुल्यो तदा संपूर्णं मुथशीलेन कालतुल्य जातं स्येयां ॥ भिन्नराशावपि योगमा
हा ॥ भौ त्यांशस्थितिं ॥ भं राशिसस्थयो स्वांश स्थितिशतमारूप २९।१ सत्रवि
घमानोयः न्यूनः शीघ्रगतिग्रह स्त स्वाग्रस्थादि ति विवरे स्यदीप्तांशांतरे यं दे
अल्पगतो अग्रेअधिके सति शीघ्रग्रहस्यदीप्तांशावधि दी ६ हिमा ॥ तुल्यं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्वयोरंतरं यावज्जायते॥ दीप्तांशात् न्यूनांतरे तु विद्यमानत्वे त्वर्थतः सिद्धं॥ यत्र कुत्रे एक
राशिस्थितयोर्मध्ये अल्पगत्याचेत् शीघ्रगतोऽग्रहे भंदेगतिर्महादृशोरधिकस्तदा इस्स
राफाकच्च: इस्सराफ नामा योग: स्यात्॥ अथ इस्सराफ योग: पूर्वापूर्वं दिशिभागे: ह
त्वा फलदः फलजनकः तत्फलं त्वशुभं॥ तदितरे तस्यानुसारि फलादितरे भिन्ना: ये
मुथशीलयोगास्तेस्याख्याफलाः स्वस्व स्वा नामतः सदृशफलाः॥ एतदुक्तं भ
वति॥ तेमुथशीले शुभं आते भविष्यमुथशीले शुभं भावि॥ पूर्णे शुभोत्पन्न
नेइति॥ इत्येकराशिस्थितग्रहयोर्जातेमुथशीले॥ अन्यस्या पि-चेद्यस्यापि
तत्राशिस्थितत्वात् द्वयोरेकराशिस्थितमुथशीलनतोमुथशीलं भवति तदा कंबू
लनामयोगः उक्तः॥ अथ अन्यर्भगत मुथशीलयोगोदाहरणं॥ शीघ्रगतिग्रहश्च
द्र: ४।२९।२३ अल्पगतिग्रहो बुधः ४।२९।३९ एकराशौ अंशे ८।१७ इत:
दीप्तांशमध्ये स्थितेन मुथशीलयोगः सूर्यचंद्रयोः॥ अथ अन्यराश्य मुथशीलोदा
हरणं॥ शीघ्रगतिग्रहो बुधः ४।१७।२५ अल्पगतिग्रहः सूर्यः ४।२९।३९
दीप्तांशाधिकभागेराधिकः अतः सूर्यबुधयोरेवक: मुथशीलयोग:॥ भि
न्नराशोस्याख्यमुथशीलोदाहरणं॥ अतिमांशस्थित शीघ्रगतिसूर्यात् ४।२९।३९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तद्वीलीयराशिस्थित मंदगतिर्न होयोप्स: ५।२९।१० स्वदी त्रिभागामध्ये सिअ
तोएथ्यं कमुथशीलेनां इसराफयोगोदाहरणं।। मंदगति न हाधुधातू ४।१९।८।७३ शी
घ्रगतिग्रह चंद्र: ४।२९।२३ अधिक: अनयोर्योरिस्वराफ।। अथ कंबुलयो
गोदाहरणं।। सूर्य: ४।२९।३१। शुक्र: ४।२९।२५। अनयोमुथशीलमसिंह्य चंद्र:
४।२९।२३। स्याप्य सिअतो कंबुलियोग:।। इतियोगत्रयोदाहरणं।। अथैषां शु
भाशुभमाह।। स्वर्गीतो तिमुथशीलादेयै त्रयोयोगा: स्वर्णो चरस्वराशौ स्योच्चे
गृहेसति शुभदा: स्वहद्दे मुखे स्वहद्दे द्रेष्काणे नवांशमध्या मध्यफलदा:
स्वनीचारि[illegible] ईस्वनीचे स्वशत्रुगृहे नीचा: अधमफला: स्वगे पुरगृहे
एथानदग्रेणिवा क्वपिभिन्नराशिस्थ्वेपि अन्योन्यदृष्ट्यो एकराशिस्थ
गृहयोस्तता: मुथशीलादयोयोगा: भवंतित्यर्थ:।। इतियोगत्रयसाध
नं।। अथ पंचवर्गीबलमाह।। त्रैराशिति।। स्वगृहस्थितग्रहे त्रिंश
त् ३० इत्ते स्याप्यं सुहृदो मित्रगृहेतिशय: पंचदश १५ शत्रुगृहे वेदा: ४
चत्वार: तदर्धमिति स्वहद्दायां पंचदश १५ मित्रहद्दायां सार्धा: सप्त ७।३०

19

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२ मेषस्थित सूर्यः दश अंशपर्यंतं मंगलद्रेष्काणपः ततः दश अंशपः तेरविंशतः दश १० अंशपः तं गुरुः अतः शुभः ॥

१० शत्रुग्रहद्रेष्काणां द्वौ २ ॥ ततो द्रेष्काणे त्र्यंशा इति स्वद्रेष्काणे दश १० मित्रद्रेष्का
णे पंच ५ शत्रुद्रेष्काणे द्वौ २ ॥ ३ ॥ द्रेष्काणचक्रं ॥ आद्यो लग्नाद्या द्वितीयो पिमध्य
मा सितात् ता क्रियतो द्रेष्काणपाः ॥
स्पतु वांशे पंच ५ मित्रनवांशे सा
र्ध द्वौ २ ॥ ३ ॥ ७ ॥ शत्रुनवांशे त्र्यंशे शान
स्य पं ० ॥ ३ ॥ ० ॥ उच्चे परमोच्चे व्यो

मे	वृ	मि	क	सिं	क	तु	वृ	ध	म	कुं	मी
मं	गु	बु	शु	श	शु	चं	मं	गु	बु	गु	श
र	चं	मं	शु	बु	शु	श	शु	चं	मं	गु	बु
शु	श	र	चं	मं	गु	बु	शु	श	गु	चं	मं

म दशः २० ॥ परमनीचे शून्यं ० मध्ये उच्चनीचांतराले अनुपातात् सा
ध्यं ॥ अनुपात माह ॥ नीचे ति ॥ नीच स्थवर्गांतरं कार्यं षड्भाधिकं च शु
द्धिको धिकं तत्पात् चक्रतः द्वादशतः शोध्यं षड्राशिन्यूनं तदा स्थित मे
व स्यर्थतः सिद्धं ॥ तस्य लवाः अंशाः कार्याः पश्चात् त्रैराशिकं ... तत्र
जातके ताजके शास्त्रे तुंगजं उच्चबलं भवतीति ॥ एवमन्यत्र ... मुख्याः पं
चवर्गजायुते मुख्याः प्रधानाः पंचवर्गाः गृहउच्चहद्द्रेष्काणनवांशेस्तु
तेभ्यो जातानां बलानां पादं तिरेक्यं तस्याः पादः चतुर्थो शः अंशप ॥

१०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जवर्ग्यो विंशोपकाः विंशोपका स्वकबलमिसर्य ॥ त्र्यंशोनसप्त ६।५०अल्पेबले सतितिग्मः त्रिवि वलेः सत्र्यंशात्रयोदश १३।२० त्मेमध्यमबले तलोधि कपूर्णबलमिति सर्वत्रज्ञेयं ॥ विंशति विंशोपकानांव्यधा विभागइतित्वं दुदाहरणं ॥ रविः ५।२५।४२।२ शात्रोः बुधस्य गृहे कन्यायांतिष्ठति अतः शत्रु गृहे वेदा इत्युक्तत्वाद्गृहे ४ गृहेशा ह्या : निचं ६।१०।५ ऽमान्यूनमतोयथास्थि तमेव उस्थलवाः १५।१८।५८ नवभिर्भक्ताः जातं उच्चबलं १।४२।॥ कन्यायांभौमस्य मित्रस्यगृहेस्ति अतो जातं हृदबलं ७।३०॥ बुधस्यद्रेष्का णे स्ति अत स्वे राशिकबलं २।२० अत्र रविः स्वमेवांशकेस्ति अतो जातं नवांशबलं ५ पंचवर्गयुतिः २०।४२ अस्यापादो जाताः रवेः पंचवर्गीबले विंशोपकाः ॥ एवं जातानि सर्वे षां ग्रहाणां बलानि तद्युति विंशोपकाख्यं लि ख्यंते ॥ इति पंचवर्गीबलाध्यायः ॥ अथ वर्षेशज्ञानार्थं पंचाधिकारिणा नं विविच्यते तत्रादौ त्रैराशीकेश्वरानाह ॥ सूर्येति ॥ मेषाद्येषु चतुर्षु राशिषु वर्तमानायां हायनतनौ वर्षप्रवेशलग्ने सति तोअह्नि निशि दिनरात्र्योः स्वामि नौ स्तः तद्यथा ॥ वर्षप्रवेशसमये मेषलग्ने दिवा रात्रौ क्रमात् सूर्यज्यौ सूर्य शिवौ राशिकेश्वरौ स्तः ॥ वृषभ्ये शुक्रचंद्रौ ॥ मिथुने शनिबुधौ ॥ कर्के शुक्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भौमोगादिवारात्रौ त्रैराशिकेश्वराधिपति सर्वत्र संवनीयं ॥ तौकरित: सिंहात्च
तुर्षु राशिषु विपरीतौज्ञेयो तथा ॥ सिंहलग्ने वर्षप्रवेशे दिवारात्र्यो: क्रमात्
सूरनीसू: ॥ कन्यायां चंद्रशुक्रौ ॥ तुलायां बुधशनी ॥ वृश्चिके भौमशुक्रौ ॥
अथ चापाद्यनुपश्च तुर्षु राशिषु लग्नस्थेषु सदा दिने रात्रौ च पि क्रमात् पूर्व
भौमगुरू चंद्रसौरा त्रिराशिकाधीश्वरा भवंति ॥ अथ पंचाधिकारिमध्ये त्रैराशि
केश्वर मुक्ता नीवधिकारि चतुष्टयं वर्षेशनिर्णयं चाह निशिति ॥ निशि
रात्रौ वर्षप्रवेशे अब्जभपति: अब्जस्य चंद्रस्य यद्राशौ तत्पतिरधिकारि ॥ दिवाव
र्षप्रवेशे अर्कभपति: अर्क: सूर्यो यद्राशौ तत्पतिरधिकारि ॥ जन्माब्द ल
ग्नेश्विहेशा: जन्मलग्नवर्षलग्नमुंथास्थानि त्रैराशिकपा अत्रैते पांचपंचस्व
संदां पंचाधिकारिग्रहाणां मध्ये यो नापाधिक: पंचवर्गी बलोधिक: ल
ग्नं दृष्टुं लग्नं पश्यति च. स ग्रह: अब्दवर्षे अब्दस: वर्षशो भवति ॥ अन्य
बलोपि न्यूनबलोपि दृष्टिसहित: दृष्टियुक्त: अब्देश इति ॥ न्यून बलोपि दृष्टि
सहितएव वर्षेशो भवति ॥ नान्येशत्यर्थ: ॥ साम्ये बलदृयो: समान बलेय:
अधिकदृक् अधिकदृष्टियुत: सएव वर्षेश: ॥ दृक्साम्ये बलसाम्ये अकिंचि
वा वर्षप्रवेशे रविवर्षेश: ॥ निशि रात्रौ वर्षप्रवेशे चेद्रावर्षे [illegible] असत्को अस्ता
वेन अस्तको असोरयि श्चंद्रो ना पंचाधिकारीमध्ये नान्येतदा त्रैराशीकेश्वर

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एववर्षेशोज्ञेयः ॥ अथोदाहरणं ॥ जन्मलग्नस्वामीशुक्रः ॥ वर्षलग्नस्वामीशुक्रः
मुंथेशः शुक्रः ॥ त्रैराशिकेशोबुधः ॥ दिवासूर्यक्रांतराशीशोबुधः ; अत्रबुधस्य
बलाधिक्याद्दृष्ट्याधिक्याच्चबुधस्यवर्षेशत्वं ॥ ॥ इत्यब्देशविचारः ; अथशु
भाशुभमुंथाफल ॥ यंशाइति ॥ जन्मतनोर्जन्मलग्नस्ययेशाभागाः ; तएव
मुंथहाख्याः ; अंशाभइति ॥ समुथहास्वेशादृष्टे ॥ स्वचस्वामिदृष्टायुतावा ॥ तत्रास्वा
मिदृष्टेनस्वामिमित्रेणतथाबलान्वितेनबलयुतेन ॥ शुभेनशुभग्रहेणदृष्टा
युतावाइष्टाइष्टफलदा ॥ अन्यथा ॥
स्वामिशत्रुणातथापापग्रहेणयुता
दृष्टावातदादुष्टा अनिष्टफलदा ॥
शुभामुंथासंज्ञावेतनुधनसहज
पंचमनवमदशमैकादशस्थाने
स्थिताशुभफलदा ॥ दुष्टा अशुभा
मुंथाअस्तिदुष्टभावेचतुर्थष
ष्ठसप्तमाष्टद्वादशभावेदुष्टसतीदु
ष्टफलदा ॥ पूर्वोक्तादुष्टामुंथाहाशु
भभावे ॥ पूर्वोक्ताशुभादुष्टादुष्ट

अथपंचवर्गीबलचक्रं ॥ ५ ॥

सू	चं	मं	बु	बृ	शु	श	ग्र
४।०	४	३।०	२५	२५।०	४।०	३।०	ग्र
३२।४२	२६	३२।३५	३८।२८	२८।५८	३।५८	२	उच्च
७।३०	२।०	७।३०	२५	७।३०	२।०	२।०	दृक्ष
२।२०	२।२०	२।०	२।२०	२०	२०	२०	ओजादि
५।०	२।३०	४०	४०	२।३०	४०	२।३०	मुस.
२०।३२	२९।२५	५५	४९।२२	४६।२९	५९।५८	५४।५४	योग
५।२	७।२९	२५।२२	२२।२२	२१।३४	२।५	२।२३	वेष्टन.
अ.	म.	पू.	म.	म.	अ.	म.	बल

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१२

भावेष्वितिवैपरीत्यसति फलं नो किंचित् शुभाशुभफलं नास्ति॥ सुत ८ षट् ६
सुखा ४ त्य १२ ष्वपि ८ गा इति॥ तस्मादेतत्स्थानगा मुथहा दुष्टा॥ अन्यथा त्वेय
म द्वितीयतृतीयपंचमनवमदशमैकादशस्थानगा भावेषु स्वभावपाकेन शु
भाशुभफलदात्री पूर्वोक्ता स्यात्॥ इति शुभाशुभमुंथहाविचारः॥ अथ ग्रहशुभ
मध्याधमफलोद्देशविचारमाह॥ स्वर्क्षेति॥ यो ग्रहः स्वर्क्षे स्वेष्टभवर्गगः स्व
राशौ स्वोच्चे मित्रस्य द्वादशवर्गे स्थितः॥ शुभसुहृद्दृष्टः॥ मित्रैः शुभैर्वा दृष्टः
जयीति॥ ग्रहयोः परस्परं युद्धे यः उदक्स्थितः स जयी इति तस्य संज्ञा
वर्षलग्नात्त्रिकोणायगतः पंचमतृतीयनवमैकादशस्थानगः॥ सौम्येः शु
भग्रहैः मुथशिली॥ मुथशिलमस्यास्तीति मुथशिली॥ सौम्यग्रहेत्थशाल
वानित्यर्थः॥ पूर्णरुक्॥ पूर्णा संपूर्णा रुक् दीप्तिर्यस्य स तथोक्तः प्रसन्नदी
प्तिरित्यर्थः॥ वर्गोत्तमकर्मगः यो राशिस्तत्रांशो वर्गोत्तमः॥ कर्मस्थानात्त्रिपू
र्वोक्तानि तत्र स्थितः एतैर्भेदैर्बली पूर्णग्रहो ज्ञेयः॥ तस्य फलमाह॥ स
न्निति॥ सन् शुभफलदः अर्धगुणवान् उक्तभेदमध्ये अर्धभेदः तदा म
ध्यः मध्यफलदः॥ अणीयान्नीचेन वर्षलग्नाद्दष्टमद्वादशषडन्यतमस्थः नी
चे नीचस्थितः अल्पो अल्पबिंबः अरिभगः शत्रुराशिस्थः जितः युद्धे

२५६

२२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१ राज्ञिता: अर्कपुत्रः असंगतः खलपुत्रः खलैः पापैर्युतः ॥ वक्रीवक्रगतिं प्राप्तः ॥ एतादृशो ग्रहः अधमः हीनबलः दशादिषु ॥ दशांतर्दशादिषु असत् अ शुभप्रदः ॥ अथ सहमान्याह ॥ शोध्यो ग्रहः इति ॥ अर्कः सूर्यः विधुतः चंद्रात् दिवा वर्षप्रवेशे सति शोध्यः ॥ अन्यथा निशि रात्रौ वर्षप्रवेशे विपरीतं चंद्रः सूर्यात् शोध्यः ॥ इति सर्वत्र ज्ञेयं ॥ ततः सानुशेष्या लग्ने योज्यं ॥ पुण्य केपु ण्यसहमं भवेत् ॥ तद्वत् एव कुजाज्जीवात् बुधः शोध्यः कर्मसहमं भवति ॥ गुरोः पुण्यं शोध्यं यशः सहमं भवति ॥ अर्कतः सूर्यात् विधुश्चंद्रः शोध्यः विद्या ख्यं सहमं भवति ॥ इनेजाछने सूर्यः शोध्यः राज्यं भवति ॥ तदेव पित्रा ख्यं पितृसहमं भवति ॥ विधुश्चंद्रात् भृगुः शुक्रः शोध्यः मातृसहमं भवति ॥ अथ गुरोः आरः भौमः शोध्यः स्वपसहमं भवति ॥ देवेज्यादिति ॥ देवेज्यात् गुरोः कुसुतो भौमः सकलकसहमं भवति ॥ चंद्राद्बुधः शोध्यः बंधकं बंधसहमं भवति ॥ कुजात् भौमात् शनिः शोध्यः द्विदूसघेशत्रुसहमं भवति ॥ पुण्यतः पु ण्यसहमात् कुजः भौमः शोध्यः शौर्यं पराक्रमसहमं भवति ॥ युनिशादिवा रात्रौ वर्षप्रवेशे सुरगुरोः विधुश्चंद्रः शोध्यः पुत्राख्यं सहमं भवति ॥ एवमग्रेऽपि ज्ञेयं ॥ दिवा रात्रौ वर्षप्रवेशे शोध्यशोधकयोर्विपर्ययो नास्ति ॥
२ तात्पर्यं कि शौर्यसहमपर्यंतं दिवा रात्रौ शोध्यशोधकयोर्विपर्ययः स्यात् पुत्रसहमादौ

पाठक्रमेणवक्ष्ये॥ गुरोः आर्किः शनिः शोध्यः आज्ञारव्यसहमं भवति॥ लग्नात् शि
तगुश्चंद्रः शोध्यः पौघसहमं भवति॥ स्वंभं धनभवनं स्वेशाअनभवनस्वामि
नः सकाशाछोध्यं द्रव्यकं भवति॥ मत्स्यारव्यमिति॥ सप्ततेरष्टमभावं बुधत्ते:
सितरुचिश्चंद्रः शोध्यः मतिसहमं भवति॥ अत्र लग्नं न योज्यं॥ अष्टमभा
वयुतं स्यात्॥ भृगोः शुक्रादार्किः शनिः शोध्यः उद्वाहं विवाहसहमं भवति॥
कुजतः बुधः शोध्यः व्यापारसहमं भवति॥ अथ मन्तुसुतात् शुक्रात् अर्कः
शोध्यः पारदार्यं परस्त्री सहमं भवति॥ अथ सहमानां सामान्यतः शुभाशु
भफलं व्याह॥ अब्दवशेनेति॥ सहमं अब्दवशेन युतं युक्तं भपेन राशिस्वामिना
वा युतं स्वेशादृष्ट्यान्वितं सहमस्वामिना वा दृष्टं वा सत् जिः शुभ स्यौहः दृष्टं युतं
वा एतादृशं सहमं सहमाधिपस्य सहमस्वामिनः क्रिस्ति मेदशायां स्वीयलग्ना
भव्दे भवति॥ पुण्यसहमं स्वदशायां पुण्यवृद्धिदं द्रव्यसहमं स्वदशा
यां धनवृद्धिदमित्यादि॥ उदाहरणं॥ चंद्रात् १।७।३२।४५। सूर्यं ५
२४।४२।१२। शोधितं शेषं ७।१२।५०।३३। लग्ने मिश्रं ६।२३।१९।१। यु
तं जातं पुण्यसहमं १।५।३२।५४। एवं अन्यानि सहमानि॥ लि
रव्यते॥ अनिम चतुर्दशपत्रे दृष्टव्यं॥ अथ दशान्याह॥ ६४॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

	१	२	३	४	५	६	७	८	९	१०	११	१२	१३	१४	१५	१६	१७	१८	१९
राहुभा मिलि स्पष्टे	पुण्य	कर्म	यश	विद्या	राज	पितृ	मातृ	क्षेम	सुख	बुद्धि	दिक्	शौर्य	पुत्र	भ्रातृ	दीर्घ	द्रव्य	मैत्र्यु	उद्योग	व्या
	२	०	७	११	१०	१०	०	९	९	[illegible]	८	८	४	११	८	११	१०	३	०
	५	११	२२	२०	२६	२६	२	२३	२३	२२	२०	२४	२०	१९	२१	३	१४	२६	११
	५१	१८	६	१०	३८	[illegible]	[illegible]	२२	२२	५४	२६	६	३५	२९	३३	४३	५०	२५	५८
	५२	४४	२६	३६	८	[illegible]	[illegible]	२३	२३	४४	४४	३४	२०	२०		५३	२९	३६	४४

अथ दशानयनार्थं स्पष्टांशादी नाहाभमिलि ॥ कुद्दयखेटांकसा ग्रहाणां भ रा | २०
शी स्य कोष्ठ इ स्पष्टशतचा: अस्यभागास्तेषां कू प्रथमे स्थाप्या: तदनंतरं अ | परस्पर
वशिष्टानां मध्ये यस्य अल्प भागास्ते द्वितीय कोष्ठके स्थाप्या: पुनरवशिष्टानां | ८
मध्ये यस्य अल्प भागास्ते तदग्रे स्थाप्या: ॥ एवमग्रे विज्ञेयं ॥ एवं दशाक्रमो | २
ज्ञेय: ॥ तदनंतरं ऊर्ध्वोर्ध्वांत: पात्याइ लि ॥ तद्यथा ॥ प्रथमाय था गता एवस्था | २
प्या: ॥ तत: प्रथमाद्वितीयाद्वितीयात्तृतीयादि सादि क्रमेण शोध्या: ॥ एके आ | ३६
पाद्या: एतेन पात्याइ लि नंदती ॥ तदन्य मत लोकांगी कृतं ॥ एते पात्यांशा:
पृथक् स्थाप्या: स्वस्युतिहृत् वर्ष युक्ति प्राइति स्वपात्या शपतेषां युति योगि
तेन हृत्क अब्दा वर्ष प्रसौर वर्ष दिवसा: ३६० अथवा सावन वर्ष दिवसा:
३६५।१५।३१।[illegible]३० तेनोत्तब्धेन गुणेन निघ्ना: गुणिता: पृथक्
स्थस्वस्व पात्यांशा: दिनाद्या: स्वस्व दशा: स्यु ॥ समाप्येति ॥ द्वयोरं शे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भौमे: साम्ये सम्मत्ये सति विलिन: चैपे वर्गीबलाधिकस्य पूर्वा प्रथमादशा
स्यात्॥ द्वयोः समबले पंचवर्गी बलसाम्ये अल्पभुक्तेन्यून गते: पूर्वा दशा ज्ञेया॥
सौरदशायां वर्षप्रवेशसमये प्रथमं सौरदशाप्रवेश: तदाद्यो वर्षप्रवेशकालि
न: सूर्यो लेख्य: प्रथमदशादिनादि प्रथमदशाप्रवेशकालिकस्य स्पष्टसूर्ये
योज्यं॥ तद्यथा सूर्यस्यांशस्थाने दिवसा योज्या: कलास्थाने घटिका योज्या:॥
लब्ध विकलास्थाने पलानि योज्यानि॥ विकलाषष्ट्या भक्ता लब्धं कलासु योज्यं॥
कलाषष्टिभक्ता लब्धमंशेषु योज्यं॥ अंशास्त्रिंशद्भक्ता लब्धं राशिषु योज्यं॥
राशयो द्वादशाधिका स्तर्हि द्वादशभि स्तष्टा: शेषराशय:॥ तादृशी सूर्ये द्विती
यदशाप्रवेश:॥ एवं द्वितीयदशाप्रवेशकालिनसूर्ये द्वितीयदशादिनादि
योज्यं॥ तादृशि सूर्ये तृतीयदशाप्रवेश: एवमग्रेपि एवं योजने वर्षप्र
वेशकालिनसूर्यतुल्य ६ अंतिमसूर्यो भवति॥ तदा सौरदशाक्रम:॥ श्रु
धोन्यथा प्रशुद्धोरस्ति॥ अथ सावनदशायां वर्षप्रवेशसमये सावनं प्रथ
मदशाप्रवेशस्ततो वर्षप्रवेशवारादौ प्रथमसावनदिनानि योज्यानि॥
तस्मिन्मासे तावति वारादौ द्वितीयदशाप्रवेश:॥ द्वितीय[illegible] दशा

दशा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श

प्रवेवारादौ द्वितीयदशादिनानि योज्यानि॥ तस्मिन् मासे तावति वारादौ तृतीयदशा
प्रवेशः॥ एवमग्रेपि॥ एवं योजिते निम वर्षप्रवेश वारादिकं भायाति॥ तदा[illegible]द
शाप्रवेशः शुद्धो न्यथा सुद्धः॥ अथान्यंतर्दशासाधनमाह॥ तेशाइति॥ तेषां
पात्यांशाः स्वैक्यविहृद्दशादिनाहताः स्वपात्यांशास्तेषामैक्येन योग न हृद्दंकानि
यानि दशादिनानि तेभ्यो पलब्धं तेन हताः गुणिताः पृथक् पात्यांशाः अं
तर्दशादिनाधाः स्युः॥ एतदुक्तं भवति॥ यस्य दशापातेन पात्यांशयोगेन भक्तं
यल्लब्धं तेन पृथक् पात्यांशा गुणितास्तस्य दशायामंतर्दशादिनानि भवंति॥
अत्र यस्य मध्ये अंतर्दशा क्रियते तत्र तस्यैवांतर्दशा प्रथमा ततस्तदग्रिम
ग्रिमक्रमेण ज्ञेयं॥ अथोदाहरणं॥ शुक्रः सर्वापेक्षया न्यूनांशः अतो मंत्र
क्रा प्रथमं शुक्रः स्थापितः २।४३।३९ ततो भौमः ४।४४।४ ततो गुरुः॥
४।५७।० ततश्चंद्रः॥८।३२।४५। ततो बुधः ८।४८।११। ततो लग्नं॥
२३।११।१९। ततोर्कः २४।४२।१२ ततः शनिः २८।१९।११ अथ प्रथमं य
थास्थिताः शुक्रपात्यांशाः २।४३।३९।[redacted]भौम हीनांशाः ४।४५।४६॥ एते
मध्ये शोधिता जाताः भौमपात्यांशाः २।२।७ एवं पूर्वांशाः अग्रिमाग्रि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

७५

॥मध्ये शोधिता: सर्वे पां जाता: पात्यांशा: गुरु: ०।११।१४।चंद्र:२।३९।४५
बुध: ०।१५।२५।लग्न १५।१२।२८।सूर्य: ११४।१३।शनि: ३।३६।५९।एते
पांयोग: २८।११।१७।अनेन वर्षमीति॥ ३६०भ काजातो गुणक: १२।४२।४३।
अनेन शुक्रस्य पात्यांशा: २।४३।३९।गुणिता: जाता नि॥ शुक्र दशा दिनानि ३४
४०।१८।अथवा पात्यांशयोगेन २८।११।१७।वर्षमिति ३६५।१५।३१।३०
भ काजातो गुणक: १२।५३।५७।अनेन शुक्रस्य पात्यांशा: गुणिता: जाता
नि शुक्रस्य दशा दिनानि ३५।२०।४०।एवं जाता: सर्वे षां नां शा: पात्यांशा:
सौर सावन दशा दि[illegible]नाधानि रच्यंते॥ अथांतर्दशोदाहरणं॥ शुक्र दशा ३४।
४०।१८।पात्यांशयोगेन २८।११।१७।भ काजातो गुणक: २।१३।२८ अने
न शुक्रपात्यांश गुणिता जाता शुक्र दशा मध्ये शुक्रस्यांतर्दशा ३।२०।२० अथ
शुक्रस्य सावन दशा ३५।२०।४०।पात्यांशयोगेन २८।११।१७।भ काजातो
गुणक: २।१४।३२।अनेन गुणिता: शुक्रस्य पात्यांशा जाता शुक्र दशाम
ध्ये शुक्रस्यांतर्दशा ३।२३।१७।एवं जाता शुक्र दशा मध्ये अंतर्दशा एवं स
र्वे षां सौरसावनां तर्दशा लिख्यंते॥ इति दशांतर्दशाक्रम:॥ अथ रव्यादि
दशा मध्ये केषामंतर्दशा शुभाशुभ[illegible]॥ जायते॥ इनोऽसूर्यमार्यांतर्दशोऽशा:

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सु	चं	व्व	चं	बु	ते	सु	श	के	
३ ४३ ३९	४ ४५ ४६	४ ५६ ०	६ ३२ ४५	७ ४८ ११	२३ ० ९	२४ ४२ १२	२८ १९ ११	० ० ०	
२ ४३ ३९	२ २ ६	० ११ १४	२ ३५ ४५	० १५ २६	१५ १२ ४६	१ ५१ ३८	३ ३६ ५९	२८ १९ ११	
३४ ४० १८	२५ ५२ २१	२ २२ ४८	३२ ५६ ५४	३ १६ १२	१९३ २५ ३०	२१ २४ २३	५५ ५८ १७	३६० ० ०	
५ २४ ४२ १२	६ २९ ३२ ३०	७ २५ १४ १०	७ २६ ३६ १९	९ ० ३८ ३३	९ ३ १६ ४५	३ १६ १९ २२	८ ८ ४३ १५	५ २४ ४९ १२	[illegible]

सु	चं	भौ	चं	बु	ते	सु	श	के.	
३ ४३ ३९	४ ४५ ४६	४ ५६ ०	६ ३२ ४५	७ ४८ ११	२३ ० ९	२४ ४२ १२	२८ १९ ११	० ० ०	हीनतत्वा:
२ ४३ ३९	२ २ ६	० १४ १४	२ ३५ ४५	० १५ २६	१५ १२ ४६	१ ५१ ३८	३ ३६ ५९	२८ १९ ११	पातितलवा:
३५ १० ४०	३६ १५ ६	२ २४ ५३	३३ २८ ४८	३ १९ ३०	१९१ १५ ९	२१ ४३ १	४८ ३८ ३४	३६६ १५ ३१	दशा:

शुभा॥ तत्रथा॥ ज्ञीवारेंदव: रविदशायां गुरुभौमचंद्रा: अंतर्दशेशा: शुभा: ॥१॥ इंद
नेत्रयं र दारयपेंदवो बुधतस्मात्रयं बुधगुरुशुक्रा: चंद्रदशायामंतर्दशेशा:
चं शुभा: ॥२॥ नेंदुभौमदशायां सूर्य शौ अंतर्दशेशौ ॥३॥ गिवनेत्र्या: बुधदशा
यां शुक्रसूर्यगुरवोंतर्दशेशा: शितिंद्वर्का: गुरुदशायां॥ शुक्रेचंद्रा: सु
अंतर्दशेशा: ॥ झेज्ययमा: शुक्रदशायां॥ बुधगुरुशनिश्चरा: अंतर्द

३१.

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१६

शशा ॥ बुधत्रयं बुध गुरु शुक्राः शनिदशायां अंतर्दशेशाः शुभा इति ॥ स
र्वत्र संबंधः ॥ अनुक्ता अशुभास्युः ॥ अथ मासप्रवेशानाह ॥

सू	मं	रा	चं	बु	ल	शु	श	के	शु	मं	रा	चं	बु	ल	शु	श	के	अंतर्दशेशा ॥
३	०	१	३	०	१८	२	४	३५	३	२	०	३	०	१८	२	४	३५	तत्वेति ॥ गतैकु
२०	२९	१३	१०	१८	३६	३	२५	३०	२३	३१	१३	१३	१९	५४	५	२९	५०	राशिस्फुटजन्म कालिकसूर्येण
२०	३१	४६	४२	५६	३९	४४	३९	१८	१६	४१	५६	४०	१०	४९	३१	३२	४०	तुल्ये रवौ समये दितीथादिमा

सप्रवेशः स्यादिति ॥ प्रतिमासं खेचरान् ग्रहान् तन्वाद्यान् लग्नादीन्
द्वादशभावांश्च स्पष्टान् चा ॥ ऽ अमलं वेद भावांशकौ ॥ ऽ अमल रसांतत्रलवो नवां
शस्तस्येदृश्या मीभावा शकौ ॥ भावास्तन्वादयस्तेषां येऽशाः नवांश
तस्वामी ॥ ततोऽभोऽग्नि नयेत् ॥ तत् दुक्र भवति ॥ प्रथममासप्रवेशस्तु
वर्षप्रवेशसमय एव जातस्तत्र जन्मार्कतुल्य एव वो को सिद्यः ॥ जन्मसू
र्ये येन राशियोजिते तत्तुल्यसूर्ये यदि ने यस्मिन् समये तत्र द्विती
यमासप्रवेशो भवति ॥ एवं द्वितीयमासप्रवेशार्के येन स्मिन् राशौ यो
जिते तत्तुल्येऽर्के तृतीयमासप्रवेशो भवति ॥ एवमग्रे पि बोध्यं ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथ पंचांगात् मासप्रवेशघटिकानयनं ॥ यथेष्टराशियोगेन जातो मासप्रवेशार्कः
अस्यासन्नपंचांगस्थितयोः ध्रुवध्रुवकयोः सदवधिस्थितार्के मासप्रवेशार्कयोरंतरं का
र्यं गतस्य कला कार्या: अवधिस्थितार्कगत्या भाज्या: फलं दिनाद्यं ॥ तिथ्यादिवारघटि
का समर्काद्यं तस्माद्यं अवधिस्थवारादौ हीनयुक्कार्यं ॥ तद्यथा ॥ मासप्रवेशा
र्के न्यूने अवधिस्थवारादौ हीनं कार्यं ॥ न्यूने युक्तं कार्यं ॥ अवधिस्थवारादयश्चैत
त्र संस्काररहिता वारघटिपलात्मकोऽब्दपो ग्राह्यः ॥ सत्यथा ॥ यस्मात् पंथात् पं
चांगस्थितः सूर्यः साधितः ॥ तस्मादब्दपः साध्यः ॥ अवधिस्थघटिकानेया
स्था ॥ कुतः यत्ग्रामस्थदेशांतरचरसंस्कारस्य हतत्वात् ॥ ततः मासप्रवेशकाले स्थूल
घटिका भवंति ॥ ततः सूक्ष्मघटिकानयनार्थं उपाय ॥ अब्दपे उदयांतर भुजफलं च
र देशांतरसंस्काराः कार्याः सोऽब्दपः सूक्ष्मो भवति ॥ तत्रादौ उदयांतरमाह ॥ यस्मिन् दि
नेऽयस्मिन् समये स्थूलमानेन मासप्रवेशो जातः तस्मिन् दिने तावति समये मध्यमो
रविः कार्यः ॥ सत्र्ययनांशकः कार्याः तस्य भागाः कार्याः ॥ षड्भिर्भाज्या: फलं घ
टिपलात्मकं ग्राह्यं ॥ तदनंतरं मासप्रवेशकालिक सायन मध्यम सूर्यस्य यावंतो
राशयस्तत्संख्यकानां मेषादारभ्य पलात्मकानां उदयानां योगः कार्यः तदनंतरं सू
र्यस्य भुक्तभागाः सूर्यस्य भोग्यराश्युदयो गुण्यः त्रिंशत् ३० हृतः फलं राश्युदये

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१८ योगेसुक्तं कार्यं ॥ षष्ठ्याभक्तं कलाद्यं घटिकाद्यं स्यात् ॥ तस्मिन् पूर्वं घटिकाः शोध्याः ॥
शेषं धनसंज्ञकं ॥ उदयानंतरं भवति ॥ यदाधिता सु पूर्वं घटिका न शुध्यास्तदा विपरीता
शोध्याः ॥ शेषं घटिकात्मकं ऋणसंज्ञकं उदयानंतरं भवति ॥ इदं उदयानंतरं धनं चेत्त
दा जन्मघटिकासु ऋणं कार्यं ॥ ऋणं चेत्तदा धनं कार्यं ॥ अथ भुजफलमाह ॥ मासप्र
वेशकालिकमध्यमसूर्यात् मंदफलं साध्यं तस्य कलाः कार्याः ॥ षष्ट्याधिकशतत्रयेभा ३६०
ज्याः फलं घटिकाद्यं भुजफलसंज्ञकं भवति ॥ मंदफलं धनं चेत्तदा भुजफलं धनं ऋणं
चेदृणं ॥ इदं भुजफलं धनं चेदुदयांतरसंस्कृतजन्मघटिकासु ऋणं कार्यं ऋणं चे
द्धनं कार्यं ॥ अथ चरसंस्कारमाह ॥ मासप्रवेशकालिकमध्यसूर्याद्यं मंदफलमान
तं तन्मध्यमसूर्ये यथागतं धनर्णं देयं तस्मात्स्फुटात् सायनं चरमानीय षष्ट्याभक्तं
घटिकाद्यं कार्यं तत् घटिकाद्यं तत्र उदयांतरभुजफलसंस्कृतघटिकासु धनं
चेदृणं कार्यं ॥ ऋणं चेद्धनं कार्यं ॥ अथ देशांतरसंस्कारमाह ॥ यावंति देशांतर
योजनानि भवंति तानि चतुर्थांशेन ताभिः कार्याणि ॥ तत्र फलानि पलात्मकानि भवंति ॥
तत्फलात्मकदेशांतरं धनं चेदुदयांतरभुजफलचरसंस्कृतघटिकासु ऋणं कार्यं ॥
ऋणं चेद्धनं कार्यं ॥ एतत्फलचतुष्टयसंस्कारे कृते अभीष्टघटिकाः स्पष्टा भवंति ॥
परं तु एतत् संस्कारचतुष्टयमध्ये जन्मकालिकसूर्यो यावद्भिः संस्कारैः संस्कृ

१८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तोभवति॥ तावज्जः संस्कारै रस्प: संस्कार्या: अवधिस्थार्कमासप्रवेशार्क योरंतरात् पूर्वपदव्द्यादिकमागतं तस्पष्टाद्दष्पेउ क्रवद्धीनयुक्कार्यं॥ ततः मासप्रवे शसूर्स्यघटिका: यत्नंति॥ तस्मिन्काले स्पष्टग्रहकान्लग्नाद्याभावाश्च पंचवर्गि का: कार्या: ॥ ततो मासेश निर्णयः॥ तद्यथा॥ मासलग्नेशजन्मलग्नेशमुंथेश त्रिराशिशद्दिनराशिपावर्षलग्नेश्वराणां मध्येय: पंचवर्गबलाधिको मासलग्नं पश्यति स मासेश्वरो ज्ञेयः॥ वर्षलोदिसाम्येनुवर्षेशवद्विचारणीयं॥ ॥उदाहरणं॥ रवि: ५।२५।४२।१२। यत्रराशियुक: जातो मासप्रवेशार्कः ६।२५।४२।१२। कार्तिक स्य रबुधे अवधिस्थितोर्कः ६।२४।५।१८। गति: ६०।३०। अनयोरंतरं ०।१। ३४।५४ अस्य कला: ९४।५४। गतिकला भिः ६०।३०। कला: सवर्णितो भाज्य भाजको॥ भाज्य: ५८७४। भाजकः ३६३०। भाजकेन हृते भाज्ये फलं दिनघटिपला त्मकं १।३७।५। इदं अवधिस्थाब्धे वारघटिकापलात्मके युतं ६।१९।४९ जुतः एक राशियुक रवितः अवधिस्थसूर्यस्य न्यूनत्वात्॥ एवं जाता: कार्तिकस्य पंचम्यां भौमे मासप्रवेश। स्थूलघटिका: १९।४९ अत: सूक्ष्मकालसाधनं कार्तिकस्य पं चम्यां भौमे मध्यमोर्कः ६।२५।१३।५८ आभि घटिकाभि: १९।४९ चालितं तत:॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१८ जातोमासप्रवेशकालिकमध्यमोसूर्यः ६।२६।२६।३५। अयनांशाः २१।१८ भु
कः ७।२४।३४।३५। अस्यभागाः २४।३४।३५। षड्भक्ता लब्धं घटिकात्मकं
३६।२५। सायनसूर्यस्य भुक्तराशयः सन्तुल्यमेषादारभ्यपलात्मकउदयानां योगः
२१३८। सूर्यस्यभुक्तभागाः २४।३४।३५। सोऽयवृश्चिकोदयेन ३४७ गुणितः ५०५८
त्रिंशद्भक्तः लब्धं १६८। उदययोगे २१३८ युक्तं २३०६। षष्टिभक्तं लब्धं घटिका ३८।
२५। एतन्मध्येपूर्वघटिका ३६।२५ शोधिता शेषं धनस्य भुक्तं उदयांतरं घटि
काद्यं निश्चितो विपरीतमित्युक्तत्वात् ज्ञातं ऋणं १।१।६ दस्फष्टे ४।३५।४४।३ कृतं ना
तः उदयांतरसंस्कृतो बुधः ४।३५।४३।। ।। अथभुजफलं मासप्रवेशकालि
कमध्यमसूर्यात् ६।२६।२६।३५ मंदफलं ऋणं ३।५३।४२। अस्यकलाः २०२।४२।
भाजकेन ३६० भक्ताः लब्धं घटिकाद्यं भुजफलं ऋणं ०।२८।७। विपरीतमित्युक्त
त्वाज्ज्ञातं धनं ०।३५ ३६ मुदयांतरसंस्कृताद्बुधे ४।३५।४४ युतं ज्ञातं उदयांत
रभुजफलसंस्कृतो बुधः ४।३५।२० ।। अथचरसंस्कारमाह ।। संदफलसं[redacted] स्प
ष्टार्कः ६।२४।३१।१६ अस्माच्चरं धनं ५।४०। अस्मात् ८० षष्टिभक्तं जातं घटिका
द्यं १।१२०। विपरीतमित्युक्तत्वाज्ज्ञातं ऋणं १।२०। उदयांतरभुजफल सं
१८

४८।।

[OrderDescription]
,CREATED=21.10.20 14:04
,TRANSFERRED=2020/10/21 at 14:09:13
,PAGES=36
,TYPE=STD
,NAME=S0004297
,Book Name=M-1848-KESHAVVIRCHIT VARSHPHALSHYA TIKA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection